विचित्रं रत्नसारेण मङ्गं: सौन्दर्य्यहेतवे ॥
मालतीनाञ्च कुसुममच्युतं लक्षमीश्वरि ! ।
देयं वृन्दावनेशाय हास्यसौन्दर्य्यहेतवे ॥
अम्लानपत्त्रलक्षञ्च देयं नारायणाय वै ।
सुव्रते ! व्रतपूर्णार्थं शीलसौन्दर्य्यहेतवे ॥
शुद्धस्फटिकसङ्काशं मणीन्द्रसारलक्षकम् ।
देयं मुनीन्द्रनाथाय मन:सौन्दर्य्यहेतवे ॥
प्रवालसारसङ्काशं मणिसारसहस्रकम् ।
देयं कृष्णाय भक्त्या च प्रियानुरागहेतवे ॥
माणिक्यसारलक्षञ्च देयं कृष्णाय यत्नत: ।
जन्मन: कोटिपर्य्यन्तं स्वामिसौभाग्यहेतवे ॥
कुष्माण्डं नारिकेलञ्च जम्बीरं श्रीफलं तथा ।
फलान्येतानि देयानि हरये पुत्त्रहेतवे ॥
रत्नेन्द्रसारलक्षञ्च देयं कृष्णाय यत्नत: ।
असंख्यजन्मपर्य्यन्तं स्वात्मनो धनहेतवे ॥
वाद्यं नानाप्रकारञ्च कांस्यतालादिकं परम् ।
व्रते सम्पत्तिहेत्वर्थं श्रीहरिं श्रावयेद्व्रती ॥
पायसं पिष्टकं सर्पि:शर्कराक्तं मनोहरम् ।
प्रदेयं हरये भक्त्या स्वात्मनो भोगहेतवे ॥
सुगन्धिपुष्पमाल्यानां लक्षमच्युतमीप्सितम् ।
प्रदेयं हरये भक्त्या हरिभक्तिविवृद्धये ॥
नैवेद्यानि प्रदेयानि स्वादूनि मधुराणि च ।
श्रीकृष्णप्रीतिप्राप्त्यर्थं दुर्गे ! नानाविधानि च ॥
नानाविधानि पुष्पाणि तुलसीसंयुतानि च ।
श्रीकृष्णप्रीतये भक्त्या व्रते देयानि सुव्रते ! ॥
ब्राह्मणानां सहस्रञ्च प्रत्यहं भोजयेद्व्रती ।
स्वात्मन: शस्यहेत्वर्थं व्रते जन्मनि जन्मनि ॥
पुष्पाञ्जलिशतं देयं नित्यं पूर्णञ्च पूजने ।
प्रणामशतकं देवि ! कर्त्तव्यं भक्तिहेतवे ॥
षण्मासांश्च हविष्यान्नं मासान् पञ्च फलादिकम् ।
हवि: पञ्चं जलं पञ्चं व्रते पञ्चे च सुव्रते ! ॥
रत्नप्रदीपशतकं वह्निं दद्याद्दिवानिशम् ।
रात्रौ हुताशनं कृत्वा नित्यं जागरणं व्रते ॥
स्मरणं कीर्त्तनं केलि: प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ॥
मैथुनं विविधं त्याज्यं व्रते क्रीडाविवृद्धये ।
स्नानहर्षिर्जागरणे सुबुद्धिर्मितभोजने ॥
लोभमोहकामक्रोधभयशोकविवादकम् ।
कलहञ्च परित्याज्यं व्रते बन्धुविवृद्धये ॥
संपूर्णे च व्रते देवि ! प्रतिष्ठा तदनन्तरम् ॥
त्रिंशतञ्च घटाधिकं उष्ट्रकं वस्त्रसंयुतम् ।
सभोज्यं सोपवीतञ्च सोपहारं मनोहरम् ॥
त्रिंशतञ्च घटाधिकं सहस्रं विप्रभोजनम् ।
त्रिंशतञ्च घटाधिकं सहस्रं तिलहोमकम् ॥
त्रिंशतञ्च घटाधिकं सहस्रं स्वर्णमेव च ।
देया व्रतसमाप्तौ च दक्षिणा विधिबोधिता ।
अन्यां समाप्तिदिवसे कथयिष्यामि दक्षिणाम् ॥
एतद्व्रतफलं देवि ! दृढा भक्तिर्हरौ भवेत् ।
हरितुल्यो भवेत् पुत्त्रो विख्यातो भुवनत्रये ॥
सौन्दर्य्यं स्वामिसौभाग्यमैश्वर्य्यं विपुलं धनम् ।
सर्व्ववाञ्छितसिद्धीनां बीजं जन्मनि जन्मनि ॥
इत्येवं कथितं देवि ! व्रतं कुरु महेश्वरि ! ।

पुत्त्रस्ते भविता साध्वीत्युक्त्वा च विरराम ह ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ।३-४। अध्यायौ ॥

पुण्यकृत्, त्रि, (पुण्यं करोति स्मेति । कृ + “सुकर्म्मपापमन्त्रपुण्येषु कृञ: ।” ३।२।८९। इति क्विप् । “ह्रस्वस्य तुक् पिति कृति ।” ६।१।७१। इति तुगागमश्च ।) पुण्यकर्त्ता । धार्म्मिक: । यथा, “पुण्यकृच्चाटुकारस्ते किङ्कर: सुरतेषु क: ॥”
इति भट्टि: । ५ । ९८ ॥

पुण्यगन्ध:, पुं, (पुण्य: पवित्रो हृद्यश्च गन्धोऽस्य ।) चम्पक: । इति त्रिकाण्डशेष: ॥

पुण्यजन:, पुं, (पुण्य: विरुद्धलक्षणया पापी चासौ जनश्चेति ।) राक्षस: । इत्यमर: । १।१।६२॥ यक्ष: । (यथा, हरिवंशे । २ । २६ । “सर्पै: पुण्यजनैश्चैव वीरुद्भि: पर्व्वतैस्तथा ॥” पुण्याश्रितो जन: ।) सज्जन: । इति मेदिनी । ने, १६८ ॥

पुण्यजनेश्वर:, पुं, (पुण्यजनानां यक्षाणामीश्वर: ।) कुवेर: । इत्यमर: । १ । १ । ७३ ॥ (यथा, रघु: । ९ । ६ ।
“समतया वसुवृष्टिविसर्जनै:
नियमनादसताञ्च नराधिप: ।
अनुययौ यमपुण्यजनेश्वरौ
सवरुणावरुणाग्रसरं रुचा ॥”)

पुण्यत्वचं, क्ली, (पुण्यं पवित्रं त्वचम् ।) श्वेतकुष्ठम् । इति राजनिर्घण्ट: ॥

पुण्यदर्शन:, पुं, (पुण्यं शुभजनकं दर्शनं यस्य ।) चाषपक्षी । इति राजनिर्घण्ट: ॥ (यद्दर्शनेन पुण्यं भवति तत्र, त्रि । यथा, रघु: । १ । ८६ । “तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधि: । याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥”)

पुण्यफल:, पुं, (पुण्यानि शुभानि फलानि यस्य ।) वनभेद: । तत्पर्य्याय: । लक्ष्मारामः २ । इति शब्दमाला ॥ (पुण्यस्य फलं पुण्यजन्यं फलमिति वा ।) धर्म्मजन्यफले, क्ली ॥ (यथा, मनु: । ५ । ५३ ।
“वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समा: ।
मांसानि च न खादेद्यस्तयो: पुण्यफलं समम् ॥”)

पुण्यभाक्, [ज्] त्रि, (पुण्यं भजतीति । भज + ण्वि: ।) पुण्यविशिष्ट: । यथा, पञ्चशायके । “क्रीडावन्तो विनीता लघुसुरतरता: पुण्यभाज: शशा: स्यु: ॥”

पुण्यभू:, स्त्री, (पुण्यस्य पुण्योत्पादिका वा भू: भूमि: ।) आर्य्यावर्त्तदेश: । यथा, हेमचन्द्रे ।४।१२। “आर्य्यावर्त्तो जन्मभूमिर्जिनचक्रार्द्धचक्रिणाम् । पुण्यभूराचारवेदी मध्यं विन्ध्यहिमालयो: ॥”

पुण्यभूमि:, स्त्री, (पुण्यस्य पुण्योत्पादिका वा भूमि: ।) आर्य्यावर्त्तदेश: । इत्यमर: ।२।१।८॥ स तु विन्ध्यहिमालयावधिमध्यदेश: । यथा,— “आसमुद्रात्तु पूर्व्वस्मादासमुद्रात्तु पश्चिमात् । तयोरेवान्तरं गिर्य्योरार्य्यावर्त्तं विदुर्बुधा: ॥”
इति भरतधृतमधु: ॥

पुत्त्रद: । इति शब्दरत्नावली ॥

पुण्यवान्, [त्] त्रि, (पुण्यमस्यास्तीति । पुण्य + मतुप् । मस्य व: ।) पुण्ययुक्त: । तत्पर्य्याय: । सुकृती २ धन्य: ३ । इत्यमर: ।३।१।३॥ सुकृत् ४ पुण्यकृत् ५ । इति जटाधर: ॥ धर्म्मवान् ६ श्रेयस्वान् ७ वृषवान् ८ । एते पुण्यपर्य्यायकशब्देभ्यस्तरवतुप्रत्ययेन निष्पन्ना: ॥ (यथा, महाभारते । १२ । २६७ । २८ ।
“ऊर्द्धं भित्त्वा प्रतिष्ठन्ते प्राणा: पुण्यवतां नृप ! ।
मध्यतो मध्यपुण्यानामधो दुष्कृतकर्म्मणाम् ॥”)

पुण्यश्लोक:, पुं, (पुण्य: पुण्यदायक: श्लोको यशश्चरित्रं वा यस्य ।) विष्णु: । इति श्रीभागवतम् ॥ युधिष्ठिर: । इति महाभारतम् ॥ नलराज: । इति त्रिकाण्डशेष: ॥ (यथा, महाभारते । ३ । ७४ । ११ ।
“पुण्यश्लोकस्य वै दूतो वार्ष्णेय इति विश्रुत: ॥”)
पुण्यचरित्रे, त्रि ॥ (यथा, भागवते ।१।१४।१।
“संप्रस्थिते द्वारकायां जिष्णौ बन्धुदिदृक्षया ।
ज्ञातुञ्च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥”)

पुण्यश्लोका, स्त्री, (पुण्य: पुण्यजनक: श्लोको यशश्चरित्रं वा यस्या: ।) द्रौपदी । इति शब्दमाला ॥ सीता । यथा,—
“पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिर: ।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्द्दन: ॥”
इति पुराणम् ॥

पुण्या, स्त्री, (पुनाति या पूयतेऽनयेति वा । पू + “पूञो यणुक् ह्रस्वश्च ।” उणा० ५ । १५ । इति यत् णुक् ह्रस्वश्च धातो: । ततष्टाप् ।) तुलसी । इति शब्दमाला ॥ पुण्यजनिका च ॥

पुण्यात्मा, त्रि, (पुण्य: आत्मा स्वभावो यस्य ।) पुण्यस्वभाव: । तस्य गत्यादिर्यथा,—
सुप्रज्ञोवाच ।
“शृणु विप्र ! प्रवक्ष्यामि यत्त्वया श्रोतुमिष्यते ।
पुण्यात्मनां पापिनाञ्च पन्थानं सुखदु:खदम् ॥
आदौ ब्रवीमि पन्थानं नृणां पुण्यवतामहम् ।
शृणुष्व द्विजशार्दूल ! शृण्वतां प्रीतिवर्द्धनम् ॥
प्रस्तरैरिष्टकैर्बद्धो दिव्यवस्त्रै: समावृत: ।
भाति पुण्यात्मनां पन्था: सर्व्वोपद्रववर्ज्जित: ॥
क्वचिद्गन्धर्व्वकन्याभिर्गीयते गानमुत्तमम् ।
क्वचिच्चाप्सरोराभिरप्सरोभिश्च नृत्यते ॥
क्वचिच्च वीणाक्वणनं नानावाद्यं मनोहरम् ।
क्वचित् कुसुमवृष्टिश्च क्वचिद्वायु: सुशीतल: ॥
क्वचित् पुण्या: शीततोया: कुत्रचित् भक्तशालिका: ।
क्वचिद्देवाश्च गन्धर्व्वा: पठन्ति स्तवमुत्तमम् ॥
क्वचित् क्वचिद्दीर्घिकाश्च फुल्लपद्मसुशोभिता: ।
सुच्छाया: पादपा: क्वापि पुष्पिता वञ्जुलादय: ॥
समस्तसुखसम्पन्ने पथि गच्छन्ति मानवा: ।
पुण्यात्मानो द्विजश्रेष्ठ ! सुखमत्युममवाप्य च ॥
केचित्तुरङ्गमारूढा नानालङ्कारभूषिता: ।
उद्दण्डधवलच्छत्त्रैश्छन्नात्पत्रमस्तका: ॥
केचिद्यान्ति गजारूढा रथारूढाश्च केचन ।
यानारूढा जना: केचित् सुखेन यममन्दिरम् ॥